अर्ज्जुनो नाम तेजस्वी क्षत्रियो हैहयाधिपः । दत्तात्रेय-प्रसादेन राजा बाहुसहस्रवान् । चक्रवर्त्ती महातेजा विप्राणामाश्वमेधिके । ददौ स पृथिवीं सप्तद्वीपां सपर्वतकाम्'' । हरिवं० ४करवीरे, ५मयूरे, "तृणाख्याया-मित्युक्तेः" ६तृणे ७धवले । ८शुभ्रतागुणवति त्रि० । "अहश्च कृष्णमहरर्ज्जुनं च" ऋ० ६,९,१, "अर्ज्जुनं सौरेण तेजसा शुक्लवर्णम् भा० । "कृष्णा रूपाण्यर्ज्जुना वि वो मदे विश्वा" ऋ०१०,२१,३ 'हे अग्ने ! त्वं कृष्णा कृष्णान्यर्ज्जुना अर्ज्जुनानि श्वेतवर्णानि" भा० "पिशङ्गमौञ्जीयुजमर्ज्जुनच्छविम्" माघः । (आजनि) इति ख्याते ९नेत्ररोगभेदे" "एकोयः शशरुधिरोपमस्तु विन्दुः शुक्लस्थो भवति तदर्ज्जुनं वदन्ति" माधवः । एकस्या-मातुरेकस्मिन् १०पुत्रे मेदि० ११इन्द्रे "अर्ज्जुनोवै इन्द्रोयदस्य गुह्यं नाम" शत०ब्रा० । अर्जुनस्यापत्यम् इञ् । आर्जुनिः आभिमन्यौ ।

**अर्जुनध्वज** पुं न०६त० । हनूमति । विवरणं कपिध्वजशब्दे ।

**अर्जुनपाकी** स्त्री अर्जुनः श्वेतः पाकः फलादिः यस्याः ङीप् । श्वेतपाक्यां लताभेदे हरितक्यादित्वात् फले जातस्याणोलुप् लुपि प्रकृतिव्यक्तिवचने । अर्जुनपाकी तत्फले स्त्री । [३स्त्रियां गवि, ४कुट्टिन्याञ्च ।

**अर्ज्जुनी** स्त्री गौरा० ङीष् । १उषायां, २बाहुदायां, नद्याम्

**अर्ज्जुनोपम** पु० अर्ज्जुनः स्वनामख्यातः वृक्ष उपमा यस्य । (सेगुन) इति ख्याते १शाकद्रुमे, २महापत्राख्यवृक्षे च ।

**अर्ण** पु० ऋ—न । अकारादौ १वर्णे "पञ्चार्णोमनुरीरितः" तन्त्रम् । २गमनस्वभावे त्रि० । "ऋणोरपो अनवद्यार्णाः" ऋ० १,१७४,२ "अर्णाः अरणस्वभावा" भा० "त्वं चिदर्णं मधुपः" ऋ०५,३२,८ "अर्णं गन्तारम्" भा० । ३जले न० "अग्ने ! दिवो अर्णमच्छा" ऋ०३,२२,३ । "अर्णमप्सुः" भा० । अर्णं जलमस्त्यस्य अर्श० अच् । ४नद्याम् स्त्री । "वर्धान्तामभिषाता अर्णाः" ऋ०५,४१,१४ । "अर्णाःनद्यः, भा० । अभि+अर्द्द—क्त इड़भावादि । अभ्यर्णम् । नि+न्यर्णम् वि+व्यर्णम् सम्+समर्णम् अभ्याशादौ न०तद्वत्तिनि त्रि० । "कालोऽभ्यर्णं जलागमः" इति सा०द० । "कृष्णार्णवाभ्यर्णचरैकहंसः" माघः ।

**अर्णव** पु० अर्णांसि सन्त्यस्मिन् अर्णस्+व सलोपः । १समुद्रे । "यादोरत्नैरिवार्णवः" रघुः "कृष्णार्णवाभ्यर्णचरैकहंसः" माघः २उदकयुक्ते त्रि० "ततः समुद्रादर्णवात्" सन्ध्यामन्त्रः "तिरः समुद्रमर्णवम्" ऋ०१,१९,७ । "अर्णवमुदकयुक्तम्" भा० । अर्णांसि दातृत्वेनास्त्यस्य मतुप् सलोपः । जलदातरि ३सूर्ये ४इन्द्रे च "आदित्याज्जायते वृष्टिः" गीतोक्तेः सूर्यस्य पर्जन्याधिपत्वाच्च शक्रस्य जलदातृत्वात्तथात्वम् । "सभानुरर्णवो नृचक्षाः" ऋ० २,५१,२ "शतक्रतुमर्णवं शाकिनं नरम्" ३,२,५१,२, अर्णवं पर्ज्जन्यात्मनोदकवन्तम्" भा० । ५सजले च । "अजएकपादनमितुरर्णवम्" ऋ०१०,६६,११ । "ब्रह्मलोके, एतादेवताः सृष्टा अस्मिन्नमहत्यर्णवे" ऐ०ब्रा० । अस्य समुद्रवाचित्वेन क्षीरार्णवः जलार्णवः लवणार्णवः इत्यादौ आधारतामात्रबोधः ।

**अर्णवज** पु० अर्णवात् जायते जन—ड ५त० । १समुद्रफेने रत्नमा० । २समुद्रजातमात्रे त्रि० । अर्णवजातादयोऽप्यत्र ।

**अर्णवमन्दिर** पु० अर्णवः मन्दिरमिव यस्य । वरुणे ।

**अर्णवोद्भव** पु० उद्भवत्यस्मात् उद्+भू—अपादाने अप् अर्णव उद्भवोऽस्य । १अग्निजारवृक्षे २चन्द्रे च ३अमृते न० । ४श्रियां स्त्री ।

**अर्णस्** न० ऋच्छति ऋ—असुन् उदके नुट् चेति, नुट् । जले । "सवर्णमर्णः कथमन्यथास्य" माघः । "सिन्धुर्नैपिप्येऽर्णसा" ऋ०९,१०७,१२ । [त्रि० ।

**अर्णस** पु० अर्णोऽस्त्यस्य अर्श० अच् । १समुद्रे २जलवति

**अर्णस्वत्** पु० अर्णांसि सन्त्यस्मिन् मतुप् मस्य वः १समुद्रे २जलवति त्रि० ।

**अर्णोद** पु० अर्णांसि ददाति दा—क । १मेघे २मुस्तके च जलदातरि त्रि० । [२जलोद्भवमात्रे त्रि० ।

**अर्णोभव** पु० अर्णसि जले भवति भू—अच् ७त० । १शङ्खे

**अ(आ)र्त्तगल** पु० आर्त्तइव गलति गल—अच् पृषो० वा ह्रस्वः । नीलझिण्टिकायाम् । ह्रस्वाभावे आर्त्तगलस्य ।

**अर्त्तन** न० ऋत—ल्युट् पक्षे इयङभावः । निन्दायाम् ।

**अर्त्ति** स्त्री अर्द्द—क्तिन् । १पीडायाम् । करणे क्तिन् । २धनुष्कोट्याम् । "नान्नं वाञ्छति नो निद्रामुपैत्यर्त्तिनिपीडितः" सुश्रुतः ।

**अर्त्तिका** स्त्री । ऋत—ण्वुल् । नाट्योक्तौ ज्येष्ठभगिन्याम् ।

**अर्त्तुक** त्रि० ऋत—बा० उकञ् । सर्द्दके । "समर्द्दनान्विन्दत्यर्त्तुकाह भवत्यपि हतमर्धं समर्द्दिन्दति" शत०ब्रा० ।

**अर्थ** याचने अद०चु०आत्म०द्विक०सेट् । अर्थयते आर्त्थियत । अर्थयामास । अर्थकः अर्थी अर्थितः अर्थ्यः अर्थनीयः अर्थयितुम् अर्थनम् अर्थना । अर्थयित्वा अर्थयिता 'सुराः समभ्यर्थयितार एते' कुमा० । "अवकाशं किलो-